# 2016

## M. A. Part–I

## SANSKRIT

## Paper – I

*Full Marks* : 100

*Time* : 4 Hours

***The figures in the right-hand margin indicate full marks.***

***Candidates are required to give their answers in their own words as far as practicable.***

[First Half – 60 Marks]

1. अधोलिखितेषु मन्त्रेषु ऋषिच्छन्दोदेवतानिर्देशपूर्वकं मन्त्रद्वयस्य सायणदिशा संस्कृतभाषया व्याख्या कार्या – 8×2

a) अ॒ग्निना॑ र॒यिम॑श्नव॒त् पोष॑मे॒व दि॒वेदि॑वे ।
य॒शसं॑ वी॒रव॑त्तमम् ॥

b) वायो तव प्रपृञ्चती धेना जिगाति दाशुषे ।
उरुची सोमपीतये ॥

c) कवी नो मित्रावरूणा तुविजाता उरुक्षया ।
दक्षं दधाते अपसम् ।

d) चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।
यज्ञं दधे सरस्वती ॥

e) इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
उप ब्रह्माणि वाघतः ॥

2. अधोलिखितासु भाष्यपंक्तिषु कयोश्चित् द्वयोः व्याख्या कार्या — 4×2

a) अग्निमीले इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम् ।

b) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या ।

c) सारस्वते तृचे या प्रथमा सा अन्वारम्भणीयेष्टौ सरस्वत्याः पुरोनुवाक्या ।

d) मित्रं हुवे इति मैत्रावरुणस्तृचो गवामयने आरम्भणीये चतुर्विंशेऽहनि प्रातः सवने मैत्रावरुणस्य स्तोत्रियः।

अथवा

निम्नलिखितमन्त्रेषु द्वयोः भावार्थः संस्कृतभाषया विलिख्यताम् ।

a) यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥

b) येने कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्तिविदथे धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥





c) यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः। यस्यामिदं जिन्वति प्राणदेजत्-सा नो भूमिः पूर्वपेये दधातु ॥

d) न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥

3. पृथिवीसूक्तस्य वैशिष्ट्यं प्रतिपाद्यताम् । 8

अथवा

शिवसङ्कल्पसूक्तानुसारं मनसः स्वरूपं विलिख्यताम् ।

4. अधोलिखितेषु पदेषु द्वयोः व्याकरणदिशा साधन-प्रक्रिया प्रदर्श्यताम् 4×2

a) घृताची, b) दोषावस्तः, c) कृणोतु, d) आगमत् e) एमसि ।

अथवा

प्रथमप्रश्नान्तर्गतस्य कस्यचिदेकस्य मन्त्रस्य पदपाठं प्रदर्श्य यथेच्छं द्वयोः पदयोः सूत्रोल्लेखपूर्वकं स्वराः साध्यन्ताम् ।

5. के तावत् पञ्चमहायज्ञाः? तेषां नामकरणे किं तात्पर्यम् ? तत्र पितृयज्ञस्य स्वरूपं विलिख्यताम् 10

अथवा

आधुनिकसमाजदृष्ट्या शुनः शेपोपाख्यानस्य किं वैशिष्ट्यम् तद् प्रतिपाद्यताम् ।

6. कठोपनिषदि वर्णितमात्मतत्त्वस्वरूपं यथोक्तं निरूप्यताम् । 10

अथवा

बृहदारण्यकोपनिषदि वर्णितायाः याज्ञवल्क्योपदिष्टायाः शिक्षायाः वैशिष्ट्यं प्रस्तूयताम् ।

[Second Half – 40 Marks]

1. अधोलिखितेषु निरुक्तवचनेषु द्वयोर्व्याख्या यास्कदिशा कार्या – 8×2

a) समाम्नायः समाम्नातः, स व्याख्यातव्यः ।

b) इन्द्रियनित्यं वचनमौदुम्बरायणः ।

c) न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः।

d) पूर्वापरीभूतं भावमाख्यातेनाचष्टे ।

अथवा

निर्वचनसिद्धान्तो यास्कदिशा प्रतिपाद्यताम् ।

2. निम्नाङ्कितेषु पदेषु त्रयाणां निर्वचनं यास्कदिशा प्रस्तूयताम् – 3×3

अश्वः, नदी, निघण्टुः, आचार्यः, समुद्रः, अग्निः ।

3. ऋग्वेदस्य अभ्यर्हितत्ते सत्यपि आदौ यजुर्वेदस्य व्याख्यानमुचितं न वा इति सायणदिशा उपस्थाप्यताम् । 15

अथवा

वेदोऽपौरुषेयः पौरुष्षेयो वा इति सयुक्तिकं विचार्यताम् ।

—o—